पाठ्यक्रमः (Syllabus)

# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## विद्यावारिधिप्रवेशपरीक्षायाः पाठ्यक्रमः

बहुविकल्पात्मकाः प्रश्नाः (MCQ) - 50 पूर्णाङ्काः - 50

| Sl.No. | शास्त्रम् विषयः | पाठ्क्रमः |
|---|---|---|
| 1. | अद्वैतवेदान्तः | सिद्धान्तलेशसंग्रहः - अप्पय्यदीक्षितः |

RVN Sastry
16/3/23

# आदर्शप्रश्नपत्रम्

अत्र प्रश्नपत्रस्य प्रारूपमात्रं प्रदत्तम् । प्रवेशपरीक्षायां भवद्भ्यः प्रदत्तात् पाठ्यक्रमात् एव प्रश्नाः भवेयुः ।

## राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः

### विद्यावारिधिः

**द्वितीयभागः -अद्वैतवेदान्तः** **50 -अङ्काः**

51. सद्विविक्तत्वमिति मिथ्यात्वलक्षणम् ?
 A विवरणोक्तम् B चित्सुखोक्तम्
 C आनन्दबोधोक्तम् D पद्मपादोक्तम्

52. मिथ्यात्वे हेतुभूतं दृश्यत्वम् ?
 A फलव्याप्यत्वं न भवति B वृत्तिव्याप्यत्वं न भवति
 C अस्वप्रकाशत्वं न भवति D सर्वमेतद्भवति

53. मिथ्यात्वानुमाने पक्षतावच्छेदकं भवितुमर्हतिः ?
 A प्रपञ्चत्वम् B विमतिः
 C मिथ्यात्वम् D आत्मत्वम्

54. 'विद्वान् नामरूपाद्विमुक्तः' इति श्रुत्या सूचितं मिथ्यात्वलक्षणम् ?
 A द्वितीयम् B तृतीयम्
 C पञ्चम् D नैतत्किमपि

55. अविद्यातिरिक्तदोषजन्यत्वम् भवति ?
 A व्यावहारिकत्वम् B प्रातिभासकत्वम्
 C मिथ्यात्वम् D विनाशित्वम्

56. उदासीनत्वे सतिं द्रष्टत्वम् भवति ?
 A इन्द्रियलक्षणम् B अन्तःकरणलक्षणम्
 C साक्षिलक्षणम् D जीवलक्षणम्

57. जीवन्मुक्तो भवति ?
 A चरमतत्वसाक्षात्कारानन्तरम् B प्रारब्धकर्मपरिसमाप्तौ
 C अविद्यायाः सर्वांशेन निवृत्तौ D अविद्यालेशानुवृत्तौ

58. कर्मावबोधानन्तर्यम् अभशब्दार्थो न ?
 A कर्मज्ञानस्य अनुपयोगात्
 B कर्मविधीनां स्वार्थे प्रामाण्यायोगात्

Rv... 16/3/23

C कर्मज्ञानस्य अधिकारिविशेषणत्वायोगात्

D मुमुक्षोः कर्तव्यसामान्याभावात्

59. 'तर्काप्रतिष्ठाना'दिति सूत्रमस्ति ?

A विलक्षणत्वाधिकरणे B आरम्भणाधिकरणे

C परमाणुजगदकारणत्वधिकरणे D रचनानुपपत्त्यधिकरणे

60. अनावृत्तिः शब्दादिति सूत्रम् ?

A क्रममुक्तिपरम् B विदेहकैवल्यपरम्

C जीवन्मुक्तिपरम् D श्रवणाद्यावृत्तिनिषेधपरम्

61. भामत्याम् 'अविद्याद्वितयं' किम् ?

A मूलाविद्या, तूलाविद्या च B समष्ट्यज्ञानं, व्यष्ट्यज्ञानं च

C विद्या, अध्यासश्च D अविद्या तत्संस्कारश्च

62. 'अवभासोऽध्यास' इत्येतत्संक्षिप्तलक्षणमित्याह ?

A भामतीकारः B विवरणकारः

C पञ्चपादिकाकारः D भाष्यकारः

63. वेदान्तिभिर्नाङ्गीक्रियते ?

A वेदाः परमात्मना सृष्टाः इति B वेदाः अपौरुषेयाः इति

C वेदाः अनित्याः इति D ईश्वरप्रामाण्याद्वेदप्रामाण्यमिति

64. अथातो ब्रह्मजिज्ञासा इत्यत्र अथशब्दार्थः ?

A मङ्गलम् B आनन्तर्यम्

C हेतुः D अधिकारः

65. सर्वं खल्विदं ब्रह्म तज्जलानिति वाक्यं कस्याधिकरणस्य विषयवाक्यम् ?

A सर्वत्रप्रसिध्यधिकरणम् B जिज्ञासाधिकरणम्

C अन्तराधिकरणम् D ईक्षत्यधिकरणम्

66. तत्सृष्ट्वा तदेवानुप्राविशत्' इदं च वाक्यम् अत्र वर्तते ?

A मुण्डके B श्वेताश्वतरोपनिषदि

C तैत्तरीये D माण्डूक्ये

67. अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्दिश्या इति पङ्क्तिः अत्र उपलभ्यते ?

A शांकरे भाष्ये B अद्वैतसिद्धौ

C सिद्धान्तलेशसंग्रहे D परिभाषायां

Revathy
16/3/23

68. क्वचिदप्युपाधौ सत्वेन प्रतीत्यनर्हत्वम् ?

A दृश्यत्वम्  B मित्यात्वम्

C सत्त्वम्  D अत्यन्तासत्त्वम्

69. कदाचित् कथञ्चित् चिद्विषयत्वम् अस्य विकल्पः ?

A दृश्यत्वस्य  B मिथ्यात्वस्य

C आधेः  D अनिर्वचनीयस्य

70. न वयम् अभेदं ब्रूमः भेदं व्यासेधाम इति वचनम् ?

A शंकराचार्याणां  B मधुसूदनसरस्वतीनाम

C भामतीकारणाम्  D अप्पय्यदीक्षितानाम्

71. क्षेत्रज्ञं चापि मां विद्धिः इत्यत्र क्षेत्रज्ञः ?

A मनूष्यः  B जीवः

C परमात्मा  D श्रीकृष्णः

72. नित्य प्रलयः ..................?

A सुषुप्तिः  B सर्वकार्यध्वसः

C विष्णोः इच्छासमयः  D भावकार्यध्वंसः

73. उक्थं नाम ...............?

A शस्त्रविशेषः  B गानविशेषः

C मन्त्रविशेषः  D यागविशेषः

74. अनश्नन्नन्योः ?

A निद्राति  B आविष्करोति

C तूष्णींनिष्ठति  D अभिचाकषीति

75. 'भूतान्यवन्ति' इत्यत्र अवन्ति इत्यस्य अर्थः ?

A प्रीणयन्ति  B उत्पादयन्ति

C परिपालयन्ति  D तिष्ठन्ति

**एवं क्रमेण पाठ्यक्रमानुगुणं 50 प्रश्नाः भवेयुः ।**

******

Rwsastry
16/3/23